## २०२१-२२

## शास्त्री-परीक्षा

## खण्डः–तृतीयः, अधिसत्रं–द्वितीयम्

## विषयः- अनिवार्यसंस्कृतम्, पत्रं- द्वितीयम्

---

**समयः - ३½ होराः** **सम्पूर्णाङ्काः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. अधोनिर्दिष्टसूत्रेषु कानिचन त्रीणि सूत्राणि सोदाहरणं व्याख्येयानि। ९**

**क.** पोरदुपधात्।

**ख.** एतिस्तुशास्वृदृजुषः क्यप्।

**ग.** आतश्चोपसर्गे।

**घ.** चरेष्टः।

**ङ.** गेहे कः।

**च.** भिक्षासेनादायेषु च।

**२. निम्नाङ्क्तिेषु रूपद्वयं सूत्रनिर्देशपुरस्सरं साधनीयम्। ६**

**क.** एधनीयम्।

**ख.** देयम्।

**ग.** कार्यम्।

**घ.** कारकः।

**३. अधस्तनेषु केषाञ्चित् <u>त्रयाणां</u> सूत्राणां सोदाहरणं व्याख्या विधेया -** **९**

**क.** दित्यदित्यादित्यपत्युरपदाण्ण्यः।

**ख.** उत्सादिभ्योऽञ्

**ग.** अत इञ्।

**घ.** शिवादिभ्योऽण्।

**ङ.** स्त्रीभ्यो ढक्।

**४. अधस्तनेषु किमपि रूपद्वयं सूत्रनिर्देशपूर्वकं साधनीयम्।** **६**

**क.** आश्वपतम्।

**ख.** गाङ्गः।

**ग.** कानीनः।

**घ.** रैवतिकः।

**५. पञ्चविधं ब्राह्मणलक्षणं वज्रसूचीदिशा प्रतिपादयत।** **१०**

**अथवा**

**जीवत्वाद् भवति ब्राह्मणो न वेति विवेचयत।**

**६. अधस्तनेषु कस्यापि श्लोकद्वयस्य व्याख्या यथाग्रन्थं विधेया-** **१२**

**क.** आकाशगामिनो विप्राः पतन्ति मासंभक्षणात्।

विप्राणां पतनं दृष्ट्वा ततो मांसानि वर्जयेत्।।

**ख.** न कुलेन न जात्यावा क्रियाभिर्ब्राह्मणो भवेत्।

चण्डालोऽपि हि वृत्तस्थो ब्राह्मणः स युधिष्ठिर।।

**ग.** अधीत्य चतुरो वेदान् साङ्गोपाङ्गेन तत्त्वतः।

शूद्रात् प्रतिग्रहग्राही ब्राह्मणो जायते खरः।।

**घ.** एकवर्णमिदं विश्वमासीद् पूर्वं युधिष्ठिर।

क्रर्मक्रियाविशेषेण चातुर्वर्ण्यं प्रतिष्ठितम्।।

**७. केचित् <u>चत्वारः</u> समाधेया निजग्रन्थदिशा -** ८

**क.** रामं कः अजनयत्?

**ख.**द्रोणः कस्माज्जातः?

**ग.** शूकरः कति जन्मानि?

**घ.** गौतमः कस्माज्जातः?

**ङ.** चण्डाली कम् अजनयत्?

**च.** प्रतीत्यसमुत्पादस्य द्वौ भेदौ कौ?

**छ.** बीजनिरोधे किं जायते**?**

**ज.** सम्बुद्धः किं देशयामास**?**

८. **मध्यमकशालिस्तम्बसूत्रदिशाबाह्यप्रतीत्यसमुत्पादो वर्णनीयः।** **१०**

**अथवा**

**अनिरोधमनुत्पादमिति पद्यं यथाग्रन्थं व्याख्येयम्।**

**************************************